23R

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : मे – २०२४**

**सत्र २ रे**

**विषयः संस्कृतभाषाकौशल–२ (23R426)**

| दिनांक : २५/०५/२०२४ | गुण :४० | वेळ : स. १०.०० ते ११.३० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. श्लोकद्वयस्य सान्वयमनुवादं लिखत।(३ तः२)** (१०)

१) हे हेमकार परदुःखविचारमूढ किं मां मुहुः क्षिपसि वारशतानि वह्नौ।
सन्दीप्यते मयि सुवर्णगुणातिरेको लाभः परं तव मुखे खलु भस्मपातः।।

२) वासः काञ्चनपञ्जरे नृपकराम्भोजैर्तनूमार्जनं भक्ष्यं स्वादुरसालदाडिमफलं पेयं सुधाभं पयः।
पाठ्यं संसदि रामनाम सततं धीरस्य कीरस्य मे हा हा हन्त तथापि जन्मविटपिक्रोडं मनो धावति।।

३) जातः सूर्यकुले पिता दशरथः क्षोणीभृतामग्रणीः सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं रामो येन विडम्बितोऽपि विधिना चान्ये जने का कथा।।

**प्र.२. अ) गद्यांशात् सन्धिं योजयत विघटयत वा।(७तः५)** (०५)

मुद्रणकलायाः प्राक् **हस्तेनैव** ग्रन्थाः लिख्यन्ते स्म।
भारते **अद्यापि** शताधिकानि हस्तलिखितानि वर्तन्ते **येषामध्ययनं** तथा परिपालनं करणीयम्।
तदर्थं हस्तलिखितशास्त्रस्य **उदयः जातः**। हस्तेन लिखितः अक्षरविन्यासः नाम हस्तलिखितम्।
हस्तलिखितानां सङ्कलनं, सूचीकरणं, वाचनं, स्पष्टीकरणं तथैव **संरक्षणमित्येते विषया अस्मिन् शास्त्रेऽन्तर्भूताः।**

**आ) गद्यांशात् समासानां विग्रहं कुरुत अथवा समस्तपदं कुरुत।(७तः५)** (१०)

**सूर्योदये** सर्वा पृथिवी प्रसन्ना दृश्यते। **बहवः खगाः स्वेषां नीडेभ्यः** बहिः उत्पतन्ति **कृषकाः च कर्मकराः च कार्यक्षेत्रं** गच्छन्ति। छात्राः **विद्यालयं** गच्छन्ति। सर्वत्र **प्रसन्नं वातावरणम्।**

**इ) गद्यांशं पठित्वा पश्चानां रूपाणां परिचयं लिखत।(७तः५)** (०५)

इदानीं दशवादनम्। **विद्यालये** भोजनस्य विरामः द्वादशवादने भवति। अधुना **तु विद्यार्थिनः** क्रीडाङ्गणे सानन्दं क्रीडन्ति। कन्दुकक्रीडा, विषामृतक्रीडा एते तु अतीव प्रिये। **छात्रेभ्यः** निर्मले वातावरणे खेलनम् अतीव रोचते। खेलनेन न केवलं शरीरस्वास्थ्यं वर्धते अपि तु मनःस्वास्थ्यमपि दृढं भवति।

**प्र.३ संवादे रिक्तस्थानपूर्तिं कुरुत।** (१०)

**भक्तः–** नमो नमः आचार्य। अतीव सुन्दरः देवालयः।

**आचार्यः–** नमो नमः। आम्, एषः------ अतिसुन्दरः। अत्र बहुभिः ----- स्वच्छता प्रतिदिनं क्रियते।

**भक्तः –** दृश्यते यत् अत्र नैके कर्मकराः प्रत्यहं परिसरं निर्मलं कुर्वन्ति।
कः ----- प्रचलति अधुना?

**आचार्यः–** अधुना रामायणस्य पाठः प्रचलति। नैके अर्चकाः तत् श्रद्धया पठन्ति।

**भक्तः –** आम् अहं पश्यामि यत् ------ पूजकैः रामायणस्य पाठः अत्र श्रद्धया -------।

----------